This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ आह्निकसारस्येदंपुस्तकं ज्ञेयं ॥
स्वार्थंपरोपकारार्थंचलिखितं

Acc No:- 686 M1087
Title:- आह्निकसार
subject:- ritual
पत्र :- 15

K.K.S.U. LIBRARY
RAMTEK
441106
M1087
Dist. Nagpur

Digitized by eGangotri
Checked 2012

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ प्रबोधः । आत्ममुहूर्तंनु ध्येत धर्मार्थानु चिंतयेत् । कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव-
दंतत्त्वार्थईश्वरः । रात्रेरूपांत्योमुहूर्त्तोब्राह्मः । रात्रेस्तृपश्चिमोयामोमुहूर्त्तोब्राह्मउच्यते ।
वेदाभ्यासार्थः । अत्रनिद्रायोगायश्चिनमुक्तम् । ब्राह्मेमुहूर्त्तेयानिद्रामपुण्यक्षय
कारिणी । तांकरोतिहिनोमोहाद्विरुक्लेशांश्चुध्यति । अत्रस्मरणीयमाह व्यासः । म
र्षिर्भगवान्व्यासःरुत्वेमांसंहितांपुरा । श्लोकेश्वतुर्भिर्धर्मात्मापुत्रमध्यापयच्छुकम् । मा
तापित्रसहस्राणिपुत्रदारशतानिच । संसारेष्वनुभूतानियांतियास्यंतिचापरं । हर्षस्था
नसहस्राणिभयस्थानशतानिच । दिवसेदिवसेमूढमाविशंतिनपंडितम् । ऊर्ध्वबा
हुर्विरोम्येषनचकश्चिच्छृणोतिमे ॥ धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्नानुकामान्नमपान्नलोभाद्भर्मत्यजेज्जीवितस्यापिहेतोः।नित्यो धर्मः सुखदुःखेत्वनित्येजी
वोनित्योहेतुरस्यत्वनित्यः।इमं भारतसावित्रींप्रातरुत्थाययःपठेत्।स भारतफलंप्राप्यपरं
ब्रह्माधिगच्छति।सएवप्रातःस्मरामिभवभीतिमहारिपुंत्वेनारायणंगरुडवाहनमंजनाभम्।
ग्रहामिभूतवरवारणमुक्तिहेतुंचक्रायुधंनरुणवारिजपत्रनेत्रम्।१प्रातर्नमामिमनसा
वचसाचमूर्ध्नोपादारविंदयुगलंपरमस्यपुंसः।नारायणस्यनरकार्णवतारणस्यपारायण
त्रवणविप्रपरायणस्य।२प्रातर्नमामिभजनामलपंकरंतंप्राक्सर्वजन्मकृतपापभयापह
त्यै।योग्याहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्रणाशमकरोद्धृतशंखचक्रः।३श्लोकत्र
यमिदंपुण्यंप्रातःप्रातःपठेन्नरः।लोकत्रयगुरुस्तस्येद्घोहात्मपदंहरिः।वामनपुराणे।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु
स्कास्कंदारिस्त्रिपुरांतकारी भानुः शशी भूमिसुतो बुधश्च। गुरुश्च शुक्रः शनिराहुकेतव
कुर्वंतु सर्वे मम सुप्रभातम्। सनत्कुमारः सनकः सनंदनः सनातनोप्यासुरिपिंगलो च। स
प्तस्वराः सप्तरसातलानि कुर्वंतु सर्वे मम सुप्रभातम्। पृथ्वी सगंधा सरसास्तथापः स्पर्शी च वा
युर्ज्वलितं च तेजः। नभः सशब्दं महता सहैव कुर्वंतु सर्वे मम सुप्रभातम्। श्रद्धा क्षमा व
पिर्द्या सोहः स्मांख्यविनीषणाः। कपः परभुरामश्च सप्तैते चिरजीविनः। सप्तैतान्संस्म
रेन्नित्यं मार्कंडेयं तथाष्टमम्। जीवेद्वर्षशतं सोपि सर्वव्याधिविवर्जितः। प्रयागपात्रि
ते मृत्प्रार्थना। समुद्रवसने देवि पर्वतस्तनमंडले। विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षम
स्व मे। का स्त्रायनः स्त्रो त्रिमंस्तु मगगांव स्मिन्नि मन्निचिंतिता। यातरूल्लायय परमे
श्वरः सप्रमुच्यते। रोचनां चंदनं गंधान्मृदंगं दर्पणं मणिं। गुरुमग्निं विप्रश्चैव नम

स्त्यानरेवहि।पापिष्ठंदुर्भगंवांधवेनग्नमुलूनना सिकम्।आनडुह्यायय॰पश्येन्नलकलरूपं
क्षणम्।इतिषबोधविधिः॥ ॥अंगिराः।उह्यायपश्चिमेरात्रेस्नात आचम्यवाहकम्।अंतर्धा
यनखेभूमिंशिरःप्रावृत्यवाससा।कुर्यात्सूत्रपूषीषनुष्णुवोरंशोसमाहितइति।नखेविशोषम
हूयमः।अयज्ञियेरनाईक्षितखेःसंछाद्यमेदिनीमिति।पराशरः।ततःप्रातःस्नुह्यायकु
र्याद्विल्मूत्रमेवच।नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकंभुवः।निरस्कृत्योरेकाष्ठपत्रंत्रो
ष्ठंतृणानिवा।नियम्यप्रणतोवा चंसंवीतांगोवगुंठितइति।संवीतांगआच्छादितदेहः।
अवगुंठितःप्रावृतशिराः।अंगिराः।रुह्यायज्ञोपवीतंनुपृष्टतःकर्णलंबितम्।विल्
मूत्रंनुपरीकुर्याद्यज्ञकर्णेसमाहितइति।नीवीमध्येत्रयेदर्भाबल्मसूत्रेत्रयेकृताः।पवित्रा
न्तान्विजानीयाद्यज्ञेचकर्णेवदक्षिणे।यमः।प्रस्कंडमुखस्कृपरीहूपराङ्गेप्राङ्मुखस्तथा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उदङ्मुखस्तूष्णीमध्याह्ने निशायां दक्षिणामुखः। मनुः। छायायामंधकारे रात्रावहनि वापुनः
यथासुखमुखः कुर्यात्प्राणबाधाभये षुच। मदनरत्नेहारीतः। उच्चारमैथुनेचैव पश्चात्स्नानंतु
तथावने। आर्द्रौ भोजनकालेच षट्सुमोनंसमाचरेत्। आचम्यद्वीपमंत्रेणाः। आहारंतु
रहःकुर्याद्दिवसेचैवसर्वदा। गुप्तास्यांतस्त्रयुपेतःस्यात्सकाशाद्दायतेस्त्रिया। विहारंस्त्रपुरी
षोत्सर्गः। सायणीये। गृहीत्वाजलपात्रंतु विण्मूत्रंकुरुतेयदि। तज्जलंमूत्रसदृशंपीत्वाचो
द्वायणंचरेत्। मलमूत्रंत्यजेद्दिवाविस्मृत्यैवोपवीतंदृष्ट्वेधक्। उपवीतंतदुत्सृज्यगत्वादन्यंनवं
नदेति। इत्याद्भिकेमूत्रपुरीषोत्सर्गविधिः॥ ॥अथशौचम्॥याज्ञवल्क्यः। गृहीतस्त्रीभ्रः
ष्टोल्लायमृद्दिरभ्युद्धृतेर्जलैः। गंधलेपक्षयकरंशौचंकुर्यादतंद्रितः। मनुः। यस्मिन्देशेतु
यत्नोक्तंयाचयत्रैवमृत्तिका। सेवनत्रप्रशस्तास्यान्नयाशौचंविधीयते। वसिष्ठः। एकालिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



गकरेति स्त्रउभयोर्मन्त्रिकाद्वयम् । मूत्रश्रौचंसमाख्यातंभुक्तेतद्द्विगुणंभवेत् । शौनकः । मू
त्रानुद्विगुणंभुक्तेभुक्तेत्रिगुणंभवेत् । विट्शौचमुत्सर्व्यामाहदक्षः । तिस्रोमानेदृशेकस्मि
न्नुभयोःसप्तमृत्तिका । मनुः । एतच्छौचंगृहस्थानांद्विगुणंब्रह्मचारिणाम् । त्रिगुणंतुवन
स्थानांयतीनांचचतुर्गुणम् । पितामहः । नयावदुपनीयंतेद्विजाःशूद्रसमास्तथागनाः । गंध
लेपक्षयकरंशौचमेषांविधीयते । आदित्यपुराणे । स्त्रीशूद्रयोरर्धमानंशौचंपोक्तमनी
षिभिः । द्विजशौचस्यनित्यधर्मत्वाद्विधीयते । आनेःकुर्याद्यथाशक्तेःशक्तःकुर्या
द्यथोदितम् । वृद्धपराशरः । उपविश्यविएमूत्रंकृत्वापस्तूयसत्तनविंदति । सकुर्यादर्धशौ
चंतुस्त्रस्यमानस्यसर्वदेति । बौधायनः । देशंकालंतथात्मानंद्रव्यंद्रव्यप्रयोजनम् । उपप
त्तिमवस्थांचज्ञात्वाशौचंप्रकल्पयेत् । अथलायनः । लिंगशौचंपुराकार्यंगुदशौचंततःपरम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवलः। धर्मविद्दक्षिणंहस्तमधःशौचेनयोजयेत्। तथाचवामहस्तेनतामूर्ध्वेनशोधयेत्। ऋ
षभृंगः। धाराशौचंनकर्त्तव्यंशौचेचक्षुर्विमीलयेत्। कुल्लकेनैवकर्त्तव्यंहस्तभुद्विधानतः।
भुंजानस्यगृहस्थावेवरक्षस्यनिः। पूर्वंकलावशौचंतुततःपश्चादुपस्पृशेत्। ततःकृतोप
वासंचपंचगव्येनभुध्यति। इन्द्रः। शौचंयतिः सदाकार्यःशौचमूलोयतोद्विजः। शौचा
रविहीनस्यसमस्तानिष्फलाःक्रियाः॥ ॥ इतिशौचविधिः॥ ॥ अथशरीरमलशौ
चम्। मनुः। वसाशुक्रमसृक्मज्जामूत्रंविट्कर्णविण्नराः। श्लेष्माश्रुदूषिकास्वेदो
दृग्दौतेनृणांमलाः। दूषिकानेत्रमलम्। वौधायनः। आदरीतमृदःपंचषट्सुपूर्वेषुभु
ङ्क्ये। उत्तरेपुतुषट्चदूःकेवलामिर्विभुध्यति। परकीयस्यशौदेवलः। मानुषास्थिवसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मात्रयय घुच्छिष्टमवेदूतःस्त्रोनिक्षिप्यनद्रव्यमानम्याम्युस्पर्शेचुतत्। यचुमनुः उच्छिष्ट
नुसंस्पृष्टोद्रव्यहस्तःकथंचन। अनिधायैवतद्द्रव्यमाचांतःशुचितामियात्। तिलपुवस्त
विषयम्। मार्कंडेयः। पक्वान्नेनगृहीतेनस्त्रोआरंकरोतियः। अनिधायैवतद्द्रव्यमंगेकृत्वा
समाश्रितम्। शौचंकृत्वायथान्यायंमुपस्पृश्यपथानिधि। अन्नमभ्युक्षमेत्रेवङ्कृ
र्कस्पर्शंपेत्। अरण्यनुदकेरात्रौचोरव्याघ्रकुलेपथि। कृतामूत्रंपुरीषंतुद्व्यहस्तोन
दुष्यतीतिवहस्पतिः। इतिसकृदाचमनंनिमित्तानि। अथद्विराचमननिमित्तानि। याज्ञवल्क्यः।
स्नात्वापीत्वाक्षुतेस्वप्नेभुक्त्वास्त्रीप्युपसर्पणे। आचांतःपुनराचामेद्वासोविपरिधायच। व्यासः।
दानेभोजनकालेचसंध्ययोरुभयोरपि। आचांतःपुनराचामेज्जपहोमार्चनेषुच। कौर्मे।
ओष्ठौविलिप्यकोस्पृष्ट्वावासोविपरिधायच। रेतोमूत्रपुरीषाणामुत्सर्गेष्वेवमाचमेत्। ष्ठीवित्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



ग्रथनारंभेकासच्चासागमेतथा।चत्वरंवाश्मशानंवासमागम्यद्विजोत्तमः।संध्ययोरुभयोस्तद्वदाचां
मेष्टपुनराचमेत्।बाह्यनेवस्पृशेदेनेउपहारेप्रतिग्रहे।हविर्भक्षणकालेचतद्विराचमनंस्मृतम्।दंतल
ग्नमसंहार्यलेपंमन्येनदंतवत्।नतत्रवुद्धः कुर्याद्यत्नमुद्धरणेपुनः।मवेदाशौचमस्पर्शेतत्रवध्रा
द्रुणेकृतइतिदेवलः॥ ग्रथाचमनविधिः॥कृत्वाथशौचंशास्त्र्यपादौहस्तौचमृज्जलैः।निबद्ध
शिखकक्षस्तूष्णीन्ग्राचमनंचरेत्।देवलः।उभयत्रस्थितैर्दैवैःसमाचामतियोद्विजः।सोमप
नफलंसोपिमुक्तायज्ञफलंलभेत्।उभयत्रहस्तद्वये।विष्णुः।ग्रंथिर्यस्यपवित्रस्यननेनाचम
नंचरेत्।विष्णुः।ग्राचोरूर्ध्वंजलेतिष्ठन्ग्राचांतःशुचिनाप्नियात्।जलस्थोजलस्थेषुस्थ
लस्थःस्थलकर्मसु।उभयोस्तूभयस्थस्तुकर्मस्वधिकृतोभवेत्।हारीतः।ग्राईवासाजले

(7)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्योत्तर्पणाचमनंजपम्। भुक्त्वासास्कृत्यकुर्यात्तर्पणाचमनंतपम्। देवलः। सोपानत्कोजलस्थो
वामुक्तकेशोथवापुनः। उष्णीषीवापिनावामेदूस्त्रेणावेष्यवाशिरः। श्रावस्तंबः। संध्यार्थमो
ज्ञनार्थेवापिअर्थेवातथैवच। भूम्नातृतेननाचामेज्जपाद्धिहवनेषुच। यमः। अपःकरतलवः
स्पृष्टाःसमाचामतियोद्विजः। सुरापिवतिसुव्यक्तांयमस्यवचनंयथेति। आपस्तंबः। नवर्षधा
रास्वाचामेन्नथाचपदरोहके। उदरोगनेत्रपुलस्त्यः। कंठंशिरोवाप्रावृत्याथापणगतोपिवा। अस्फु
लापादयोःशौचमाचांतोप्यशुचिर्भवेत्। उशनोगपारिजाते। कुर्याद्द्वादशगंडूषान्पुरीषोत्सर्गेनद्विजः।
मूत्रेचत्वारिगंडूषाभोजनांतेतुषोडश। भस्मभोज्यावसानेचगंडूषाष्ठोविधीयतइति। अगस्त्य
संहितायाम्। केशवाद्यैस्त्रिभिःपीत्वाद्वाभ्यांप्रक्षालयेत्करौ। द्वाभ्यामोष्ठौतुसंमृज्यद्वाभ्यांमु
खमार्जनंतथा। एकेनहस्तेप्रक्षाल्यपादावपितथैकतः। संग्रोस्पेकेनमूर्ध्नानंतनःसंकर्षणादिभिः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः क्रियाः कुरुते मोहादनाचम्यैव नास्तिकः। भवंति हि क्रियास्तस्य यथासर्वनिरर्थकाः॥१
आस्यंगतानि चक्षुर्णोचनासुरकं मुखोस्पृशेत्। एवमाचमनं कृत्वा सदा नारायणेभवेत्॥२
त्या क्रिआचमनप्रकरणम्॥ ॥ अथदंतधावनम्। अत्रिः। मुखेपर्युषितेनित्यंभवत्यशुचितो
नरः। नदाद्याकाष्ठभुक्तंवामस्तयेदंतधावनम्। कात्यायनः। नक्षीरतुचनवम्यांचदंतकाष्ठंविवर्ज
येत्। विष्णुः। नवम्यांचैवहादशरूपांवर्जयेदंतधावनम्। आदाहन्मन्महिवसविवाहेसुखदुः
खयोः। जतेचैवोपवासेचवर्जयेदंतधावनम्। नृसिंहपुराणे। प्रतिपद्दर्शषष्ठीषु नवम्यांचैवमा
रुतादंतानांकाष्ठसंयोगाद्हत्यासप्तमंकुलम्। काष्ठग्रहणात्प्राणैस्तेनदोषः। व्यासः। प्रतिपद्दर्श
षष्ठीषुनवम्यांदंतधावनम्। पलेरन्यत्रकाष्ठेतु निर्द्दोषोलेखनंस्मृतम्। अलाभेदंतकाष्ठानांनिर्घृ
ष्यांतिधौतथा। अपांद्वादशगंडूषैर्दृढंध्यादंतधावनम्। स्कांदे। अभ्यंगेचाधिरूढानदंत
धावनमेथुने। जातेचमरणेचैवतत्कालव्यापिनीतिथिः। यमः। चतुर्दशष्टमीदर्शपूर्णिमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संक्रमेरवेः। एषु स्त्रीतैलमांसानि दंतकाष्ठं च वर्जयेत्। वसिष्ठः। रात्र्यर्कभुक्रवारेषु कुजाहे व्रतवा
सरे। जन्माहेभाद्रदिवसे दंतकाष्ठं विवर्जयेत्। गर्गः। सर्जेधैर्यं वटे दीप्तिः करंजे विजयोरणे।
मुक्षजे चार्थसंपत्तिं वेदर्यां मधुरः स्वरः। रक्तद्रिरेव सौभाग्यं विल्वेतु विपुलं धनम्। औदुंबरे
चवाकुसिद्धिर्वैधर्के च दृढा मतिः। [redacted] कदंबे सकलं
लक्ष्मीरास्ये त्वारोग्यमेव च। अपामार्गे श्रुतिर्मेधा प्रज्ञा वा स्यात्खदिरे पुनः। आपुः शीलंयशो
लक्ष्मीः सौभाग्यं चोपजायते। अर्केणहंति रोगान्क्षीरवीजपूरेणतुल्यधाम्। हादिमे सिंदुवारे च
जटानेकुजेटेनथा। जाती चकरमर्दीचदुः स्वप्नंनाशयेदिति। चर्व्यानाहृद्वृद्धा याज्ञवल्क्यः।
दृष्टकाष्ठोष्ठपाषाणैर्नरंगुलिमितंथा। मुक्ताचानामिकांगुष्ठेवर्जनेयद्दंतधावनम्। तिंदुके
डुकवंशूकमोचाकरजसिद्धकम्। कार्पासदंतकाष्ठं च विष्ठोरपिहरेच्छ्रियम्। मोचाकदली।।

CC-0. In Public Domain.Kaviguru Kalidas Sanskrit University Ramtek Collection.

व्यासः पलाशमासनं पादानं दंतकाष्ठं च पादुके। वर्जयेत्तुषयत्नेन समं माध्यंदिनं वनं। प्रयोगपारिजाते यमस्मारे। अंगारवालुकापूर्णं तृणवस्त्वनलादिभिः। नकुर्यादंतकाष्ठं च श्रीकामोद्वहिनेदिने। नकुर्यादंतकाष्ठं च तैलेसिरसि संस्थिते। विष्णुः दिग्विशेषफलमाह। आग्नेयस्यधतिः सौख्यं श्रीरोगाः रोग्यमेव च। दक्षिणेनतथाकृष्टपश्चिमेनपशूनयः। उत्तरेणागवां नाशः स्त्रीणांपरिजनस्य च। पूर्वोत्तरेतुदिग्भागेसर्वान्कामानवाप्नुयात्। अंगिराः। प्रक्षाल्यप्रक्षयेत्काष्ठं प्रक्षाल्यैवतुसंत्यजेत्। मंत्रः काश्यपीखंडे। आयुर्बलंयशोवर्चः प्रजापशुवसूनि च। ब्रह्मप्रज्ञांचमेधांचत्वं नोधेहिवनस्पते। दंतधावनोत्तरंशौनकः। पक्षाद्वादशगंडूषैर्विदध्याद्दंतधावनम्। स्मृत्वोंकारंसगायत्रीं निवधीया छिखांततः। अंगिराः। पतितांत्यजपाखंडिदेवाग्नीवरजस्वलाः। निषक्रपातकिंवाऽज्ञानप्रेक्ष्या दंतधावने। क्षुनकंविड्वराहंचछागंकुक्कुटम्। अन्यान्नेक्षेद्वराम्यरूपेद्विजश्चुद्धे क्षिवस्त्रणः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ एतन्निदेतधावनम् ॥ ॥ अथपवित्रविधिः । व्यासः । कुशोदकेस्नानंकुशोतोपस्पृशेद्द्विजः ।
कुशेनचोद्धृतोयंसोमपानेनसंमितम् । यमः । कुशाःकाशास्तथादूर्वायवाव्रीह्यएवच । ब
ल्वजाःपुंडरीकाश्चिसप्तधाबर्हिरुच्यते । ~~स्मार्त्त~~ स्मृतिचिंतामणौ । माषिमास्यादृतादर्भा
न्नास्यवचोदिताः । मार्कंडेयः । भूमिमूलाभुवोदेशेस्थिताःपूर्वोत्तरामुखाः । ओंकारेणैव
मंत्रेणकुशान्सृष्ट्वाद्विजोत्तमः । विरिंचिनासहोत्पन्नपरमेष्ठिनिसर्गज । दहत्वंसर्वपाप
मिदमस्त्वस्तिकरोमव । इमंमंत्रंसमुच्चार्यततःपूर्वोत्तरामुखः । हुंफट्कारेणदर्भोत्कसमू
न्छिद्यासमुद्धरेत् । कात्यायनः । अनंतर्गर्भिणंसाग्रंरोहिदलमेवच । प्रादेशमात्रं
विज्ञेयंपवित्रंयत्नकुत्रचित् । हेमाद्रौ । अन्यान्यपिपवित्राणिकुशदूर्वामयानिच । हेमात्स
कपवित्रस्यकलांनार्हंतिषोडशीम् । पाद्मेकौत्तरीमंत्रतर्जन्यांरौप्यमेवच । तर्जीवस्तिकृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्याज्ज्येष्ठभ्रातरि जीवति । मातामहश्राद्धे कं डरक्षत्रयुरुरुयुमंदाहिकेतवः । मालिक्यमोचिना
रुविडुमंगारुडंपुनः । पुष्पगंधरोलसहस्रंनीलंगोमेदकंतथा । वैदूर्यनवरत्नानिमुक्तांताकल्प
येच्छुभान् । जपहोमादिकंकुर्यात्सर्वपूर्वोक्तवर्त्मना । योमुद्रांधारयेदंतंस्यस्युर्वश्यागाःखगाः ।
रक्तोमोमः । अहीराजुः ।। अथस्नानम् ।। ।। योगयाज्ञवल्क्यः । अस्नात्वानाचरेत्कर्मजपहो
मादिकिंचन । लालास्वेदसमाकीर्णःशयनादुत्थितःपुमान् । प्रातःस्नानंप्रशंसंतिदृष्टादृष्टफलप्रद
मत् । सर्वमर्हतिभुद्धृत्वाप्रातःस्नायीसदाशुचिः । गुणादृश्यस्नानपरस्यसाधोरुपंचतेतश्च
बलंचशोचम् । आयुष्यमारोग्यमलोलुपत्वंदुःस्वप्ननाशश्चयशश्चमेधा । स्नानंनदीदेवखा
तह्रदेषुचसरस्सुच । पंचपिंडाननुद्धृत्यस्नायात्परवारिणीति । मरीचिः । मृत्तिष्ठमुद्धृत्य
वापिरीतमुच्छ्रयथापिवा । गंगंपयःपुनात्यंभुपापमामरणांतिकम् । गंगवाक्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंदिनी नलिनी सीता मालती च महापगा। विष्णुपादाब्जसंभूता गंगा त्रिपथगामिनी। भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी। द्वादशैतानि नामानि यत्र तत्र जलाशये। स्नानोद्यतः सदा कुर्यात्स्नानदानव्रतादिकम् इति। शंखः। आपो अस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु। विश्वं हि रिप्रं प्रवहंति देवीरुदिदाभ्यः शुचिरा पूत एमि। दीक्षातपसोस्तनूरसीति तपसो वा एषा तनूर्यद्दीक्षा। याज्ञवल्क्यः। नत्वा पापहरिं देवं वारुणे जलसंस्थितः। उद्यन्नमामि तिस्रस्तु ह्यवतीर्य जलाशये। आचामेत्त्रिरुपस्पृश्य द्विरभ्युक्षेत्ततो न्यसेत्। अघमर्षणसूक्तेन त्रिरावर्तेन तत्परः। स्नानाचमनमंत्रैश्च मार्जनाचमनं तथा। जलाभिमंत्रणं चैव दशतीर्थस्य परिकल्पनम्। अघमर्षणसूक्तेन त्रिरावर्तेन नित्यशः। स्नानाचरणमित्येतदुपदृष्टं महात्मभिः। चतुर्विंशतिमंत्रेण स्नानं कृत्वा समाहितः। इत्यंतरं तावन्नर्पयेत्तिलतर्पणम् इति। तर्पणाधिकारः

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection.

माङ्व्यासः। मरीचयवीतीर्देवानां निवीती ऋषितर्पणादौ। प्राचीनावीतिपित्र्येतु त्वेवतीर्थेनमानि
नः। उशनाद्वौहस्तौ युग्मतः कृत्वा दूरयदुष्कांजलिम्। गोशृंगमात्रमुदकं तन्मध्येतलंदि
पेत्। कार्ष्णाजिनिः। देवतानामृषीणांचजलेदद्याज्जलांजलीन्। असंस्कृतप्रमीतानाञ्च ल
दद्याज्जलंपुनः। बौधायनः। जलांजलित्रयंदद्याद्येचान्येसंस्कृतामुनि। असंस्कृतप्रमीतानां
मेकमेवतटेक्षिपेत्। तत्रमंत्रः। अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम। भूमौदत्तेनतोयेन
तृप्तायांतुपरागतिमिति। भगवान्। स्योनांपृथिवीनर्पणेकृत्वायद्भूमौजलमादरेत्। तन्मंत्रः। यन्म
दूषिततोयंशरीरमलसंभवात्। तद्दोषपरिहारार्थंयत्तस्मैतत्तर्पयाम्यहम्। नदीस्नायीकोर्म।
स्नानतोज्ञानतोवापियन्मयादुष्कृतंकृतम्। तद्दाहंत्वाखिलंदेविजगन्मातर्नमोस्तुते। नदी
दर्भास्तिलैर्। विकिरेपिंडदानेचतर्पणेस्नानकर्मणि। आचांतःसव्यकुशीनदर्भसंयुतदुधः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मार्कंडेयपुराणे। स्नानमुद्दिश्य नद्यादौ गत्वाप्यंबरपाणिभिः। नग्नैर्निर्धुतपापैस्तै
र्वासश्चैवन निर्धुनेः। इति। परिधेयवस्त्रे विशेषमाह देवलः। स्नपंधौतेन कर्तव्या क्रि
या धर्म्या विपश्चिता। नतु नेजकधौतेन नाहतेन कुत्रेचित्। नेजकोरजकः। विष्णु
पुराणेऽपि नग्नश्चावस्त्रएव स्नाप्नोतस्मान्नैतथा कर्मनग्नः स्थितेऽपि। नग्नः स्या
न्मलवद्वासानग्नः कौपीनकेवलः। नग्नो हि गुणवत्त्वः स्यान्नग्नोऽघपटस्तथा। नग्नश्चस्यूत
वस्त्रः स्यान्नग्नोऽपिततल्पकः। नग्नश्चवल्कवस्त्रः स्यान्नग्नः कौपीनकेवलः। काषायवस्त्र
शास्त्राद्यैरनग्नाः प्रकीर्तिताः। कौशेयमात्रधारणएवनग्नता। नतुपरिधेयवाससः सा
हित्येपि। कौपीनपेक्षम्। उभयत्रापिकेवलस्य श्रुत्यादानात्। विष्णुपुराणे। कामदेवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेनाघासुकियासुपठेत्तथा।नैकवस्त्रःप्रवर्त्तेतदृष्टोनाचमनेतपे। नावालिः। निष्पीडितं
धौतवस्त्रंयदास्कंधेविनिक्षिपेत्।तदासुरंभवेत्कर्मपुनःस्नानंविशोधनम्।वस्त्रंचतुर्गुणीकृ
त्यनिष्पीड्यसदृशंतथा।वामप्रकोष्ठेनिक्षिप्यस्थलस्थश्चरिराचमेत्।वस्त्रंद्विगुलितंयस्तु
निष्पीडयतिमंदधीः।तथास्नानंभवेत्तस्यस्नातस्यचदुर्धावुभिः।सव्यादसात्परिभ्रष्टना
भिदृश्योवस्थितस्तनुः।एकवस्त्रंतुतंविद्याद्देवपित्र्येचकर्मणि।उत्तरीयमधोवस्त्रंतथा
पवीतेद्वेधार्ये श्रौतेस्मार्त्तेचकर्मणि।तृतीयमुत्तरीयार्थेवस्त्रमावेतदिष्यते।नावालिः।स्त्री
त्वानिवस्यवस्त्रंचद्वयेशोध्यमृदंभसा।अपवित्रीकृतेतुकोपीनस्त्रावधारिणा।इहंकोपीन
शब्दोपादानाद्यतिब्रह्मचारिविषयमित्यादुः।दक्षस्मृतः।निष्पीड्यस्नानवस्त्रंतुपश्चात्संध्यांस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माचरेत्। अन्यथा कुरुते यस्तु स्नानं तस्याफलं भवेत्। विष्णुः। ब्रह्मन्नत्र विशेषेवं स्नानं शि
ष्यते। मूर्छीमद्य हि भूरेस्य स्त्रीणां कुरुनंदनेति। दक्षः। प्रातर्मध्याह्नयोस्नानं वानप्रस्थ गृहस्थयोः।
यतेः त्रिषवणं प्रोक्तमरुद्भुत्स्नेत्रे कारिणः॥ ॥इति नित्यस्नानम्॥ ॥अथ काम्यस्नानम्॥ पुल
स्त्यः। पुष्ये चन्नन्मनस्त्रेत्र्यतीपातेचवैधृतौ। अमावास्यानदीस्नानमुत्तमं कुलमेव। त्रेत्र
रुद्रार्कसंक्रांतिषु चतुर्दश्यां यः स्नायाद्धि वसन्निधौ। नतेनलभवाप्नोतिगंगायांचविशेषतः।
ज्येष्ठमासेसितेपक्षेदशम्यांहस्तसंयुते। दशन्नाम्नाघहरणंगातेनपापहरास्मृते तिविष्णुः। सूर्ये
ग्रहणतुल्यातुशुक्लामाघस्यसप्तमी। अरुणोदयवेलायांतस्यांस्नानमहाफलम्। पुनर्व
सुवुधोपेतात्रेचमाससिताष्टमी। स्नातस्तुविधिवत्स्नात्वावाजपेयफलंलभेत्। मत्स्यपुरा
आषाढ्यांचतुर्मासंयावत्स्नायीभवेन्नरः। विष्णोर्लोकेनयेत्सार्कान्निष्कामोपद्रवंभवेत्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वेष्वपरंयाति विष्णुव्रतमिति स्मृतम्। आषाढादीत्यतद्दुःखं विज्ञानोवद्धुद्धीदिः। कार्त्तिकोगोव्रतइति वाक्यशेषात्। आदित्यपुराणे। कार्त्तिकंसकलंमासं नित्यस्नायीजितेंद्रियः। जपन्हविष्यभुक्स्नातः सर्वपापैःप्रमुच्यते। नुलामकरमेषेषुप्रातःस्नायीसदाभवेत्। हविष्यंव्रत्मचर्यंचमहापातकनाशनम्। विष्णुः। श्रीकामःसर्वदास्नानंकुर्वीतामलकैर्नरः। सप्तमीं नवमीं चैवसर्वकालंविवर्जयेत्। चंद्रिकायाम्। अपाकृतशरीरस्यकष्टंस्नानमाचरेत्। पदेपदेश्वमेधस्यफलंप्राप्नोतिमानवः। अतएवांगीङ्गिरोमासंसर्वमेनंनयेद्बुधः। ततःस्नानस्यावसानेभोज्यद्रव्यंसुसंस्कृतम्। भोजयेद्विजदंपत्यंमधुसूदनतोषणैः। दंपत्योर्वासनीसूत्रेसप्तधान्यसमन्विते। त्रिंशद्यवोद्भवापिंडाःशर्करातिलसंयुताः॥ ॥ अथाभ्यंगच्छायास्नानम्। प्रयोपरागेरिक्तेतु अष्टछायोदकेस्नायाद्दुःखच्छायेतिसोच्यते। अमागुरुसमायोगःसूर्यपर्वशताधिकः। आदित्यपुराणे। गुरुवारेव्यतीपाख्या

(13)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मध्वलक्षच्छायवारिणास्नानंघृतस्नानेनसमंपातकनाशनम्। घार्थनामंत्रः। नीवोरुदुंबरिः सौरिश्च
योगुरुरंगिराः। वाचस्पतिरेवमेवी भुमंकुर्यात्सदामम। एतैर्नामभिरष्टाभिः प्रार्थयेन्नर्घयेन्नथा। इत्य
घलक्षच्छायास्नानम्। अथसमुद्रस्नानम्। मरद्वाजः। पद्मोपवासफलदाःसमुद्रगाः। न
सोपवासफलदःसकृत्स्नातोमहोदधिः। समुद्रेपर्वसुस्नायाद्दमायातुविशेषतः। पापेर्विमुच्यो
तेसर्वैरमांतेस्नानमाचरेत्। अमौसोमदिनेस्नानंसमुद्रेचविवर्जयेत्। ग्रहणेरविवारेचपुत्रेप्युत्पु
वनाचरेत्। इतिकाम्यस्नानम्।। अथनैमित्तिकम्। दृष्टिवाद्वीर्निमुद्क्यांचपतितस्पृष्टकंत
था। श्वपंतस्पृष्टिनंचैवस्पृष्ट्वास्नानेनशुध्यति। दिवाकीर्त्तिंश्वंडालः संवर्त्तः। तस्पृष्टिनंस्पृ
ष्टेघस्नानंतस्यविधीयते। ऊर्ध्वमाचमनंप्रोक्तंब्राह्मणंप्रोक्षणंतथेति। अवुद्धिपूर्वसंस्प
र्शेदूयोःस्नानंविधीयते। बुद्धिपूर्वस्पर्शेतु। उपस्पृश्योक्तमर्थंकृतऊर्ध्वंप्रोक्षणंस्मृतम्। काष्ठा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घचेतनांतरस्पर्शेतुकोमें। चंडालसूतकिऱ्यावैःसंस्पृष्टंसंस्पृशेद्यदि।प्रमादात्तत आचम्यजपंकु
र्यात्समाहितः। अचेताःसाशास्पर्शेतुपस्नोक्तदूरस्नातरितेपिच। चतुर्विंशतिमंत्रते।चितिंचचि
तिकाष्ठंचयूपंचंडालमेवच।स्पृष्ट्वादेवलकंचैवसचैलोजलमाविशेत्। वीरान्नृपाभुपतान्नेना
च्लोकायतिकंकापिलान्। विकर्मस्थान्द्विजान्स्पृष्ट्वासचैलोजलमाविशेत्। देवार्चनपरोवि
प्रोविनार्थीवत्सरत्रयम्। सवैदेवलकोनामहव्यकव्येषुगर्हितः। देवसंनिधौपभुबंधेचदेवलस्प
स्पर्शेनस्नानम्। नस्नायादेवलंयूपंदेवस्थानेचबंधने। अन्यद्दानावुभौस्पृष्ट्वासचैलोजल
माविशेत्। व्यासः। महादिशानुमध्यमानदूपंनिशि। तस्मोस्नानंनकुर्वीतकोम्यनेमित्तिकाद
ते। पराशरः। अस्पृश्यस्पर्शनेज्ञाते अभुपाते क्षुरेमगे। स्नानंनैमित्तिकंकार्यदेवपेचविशुद्धि
नम्। देवादितर्पणंहितन्मित्त्यर्थः। दूरस्थेनैवागाहेतयदास्याद्शुचिर्नरः। आचम्यशिरसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पथ्याशयनः स्नानमाचरेत्। रुद्रमनुः। मृतेतन्मनिसंक्रांतौ क्षौरश्राद्धमदिनेतथा। अस्पृश्यस्पर्शने चैवनस्नायाद्दुष्ट्वास्त्रियं। गार्ग्यः। कुर्यान्नैमित्तिकंस्नानशीतार्द्रैःकाम्यमेवच। नित्यं यादृच्छिकंचैवयथाऽऽचारमाचरेत्॥ इतिनैमित्तिकस्नानम्॥ ॥ अथप्रक्षालनकरणं स्नानम्॥ मनुः। पञ्चादौचरवोष्ण्यांत्रिकायांचतथातिलैः। नैलाभ्यंगमनुस्नाध्यान्मुख्यावि धीयतेगर्गः। पंचद्रव्याचतुर्द्रव्यासप्तम्यारविसंक्रमे। द्वादश्यांसप्तमीषष्ठ्यास्तैलस्पर्शं विवर्जयेत्। नचकुर्यान्नृतीयायांत्रयोदश्यांतिथौतथा। नवम्यांचदशम्यांचस्नेहमालिप्यनि र्हृपंडितः। माधवीये। संतापःकांतिरल्पायुर्धनंनिर्धनतातथा। अनारोग्यमवैकामा अभ्यंगाद्भास्करादिषु। प्रचेताः। सार्षपंगांधतैलंचयत्नैलंपुष्पवासितम्। अन्यद्द्रव्य युतंतैलंनदुष्यतिकदाचन। याज्ञवल्क्यः। अथार्द्रोदकस्नानंचयाज्ञप्यमवैदिकं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

K K S U LIBRARY
RAMTEK
441 106
Dist Nagpur

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=06.10.20 11:39
,TRANSFERRED=2020/10/06 at 11:43:27
,PAGES=29
,TYPE=STD
,NAME=S0003908
,Book Name=M-1087-AANTRIKSAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection